# {भारतीयविद्वत्परिषत्} द्विरात्रः - द्विरात्रम्

Inbox
Search for all messages with label Inbox
Remove label Inbox from this conversation



Thu, Nov 9, 5:03 PM

**Mahamaho. Subrahmanyam KoradaThursday, December 14, 2023**

to bvparishat

नमो विद्वद्भ्यः

**द्विरात्रः - द्विरात्रम् -- षष्टिरात्रः - षष्टिरात्रम् -- नवरात्रः - नवरात्रम्**

There has been discussion regarding the लिङ्गम् of the term रात्र in case it is संख्यापूर्व । Let us plough through --

**प्रयोगः** --

**वेदे** -- अग्निष्टोम उक्थ्यो’तिरात्रो द्विरात्रस्त्रिरात्रश्चतूरात्रः (**4 , कृष्णयजुर्ब्राह्मणम् - तृतीयाष्टकम् - दशमप्रपाठकः -- प्रथमकाठकः - संज्ञानम् ....**) ।

Among the popular three काठकाः , starting with - संज्ञानम् - लोको'सि - तुभ्यम् -- this sentence is taken from the first काठक - each one is called by its first word / words .

I learnt all the काठकाः in a वेदपाठशाला during 1976-77 and got perfection with my father घनपाठी cum वैयाकरणः ब्रह्मश्री कोराड सुब्रह्मण्यः ।

**व्याकरणे** --

षष्टिकाः षष्टिरात्रेण पच्यन्ते पा सू 5-1-89 -- but here the लिङ्गम् of षष्टिरात्र is not clear .

What is the actual problem ?

Panini in आष्टाध्यायी rules - रात्राह्नाहाः पुंसि 2-4-29 -- द्विरात्रः - त्रिरात्रः - चतूरात्रः (**काशिका**) । द्वयोः रात्र्योः समाहारः इत्यादि ।

In the above quoted वैदिकप्रयोग also this is applicable -- a याग that is performed in two nights and so on . तादर्थ्यात् ताच्छब्द्यम् ।

**लिङ्गानुशासनम्** -- 116. नपुंसकम् - अधिकारो'यम् । 'रात्राह्नाहाः पुंसि' (814) 129. अपथपुण्याहे नपुंसके ॥ 130. संख्यापूर्वा रात्रिः । त्रिरात्रम् । संख्यापूर्वा इति किम्? सर्वरात्रः ।

**महाभाष्यम्** -- त्रिंशद्रात्रः - पञ्चदाशरात्रः (3-3-136 मर्यादावचने... , 3-3-137 कालविभागे.. ।

**अमरकोशः** -- (**तृतीयकाण्डः-लिङ्गादिसङ्ग्रहवर्गः**) -- 12. रात्राहान्ताः प्रागसंख्यकाः -- अहोरात्रः - सर्वरात्रः - पूर्वरात्रः । 'प्रागसंख्यकाः' इति किम्? पञ्चरात्रम् (**सुधाव्याख्या / रामाश्रमी**) ।

अहोरात्रः । रात्रान्तशब्दः समाहारे नपुंसकम् इति **केचन** - अहोरात्रम् । अन्यपदार्थः भिन्नलिङ्गमपि पुंलिङ्गमेव इति **केचन** -अतिक्रान्तो रात्रिम् अतिरात्रः । संख्यापूर्वपदाः रात्रान्तशब्दाः नपुंसकलिङ्गाः -- गणरात्रम् - पञ्चरात्रम् (**गुरुबालप्रबोधिका / लिङ्गाभट्टीयम्**) ।

25. रात्रं प्राक्संख्ययान्वितम् -- संख्यापूर्वपदं रात्रान्तं क्लीबम् । त्रिरात्रम् पञ्चरात्रम् । संख्ययेति किम् ? अर्धरात्रः - पूर्वरात्रः । पात्रादिभिरदन्तैः एकार्थो द्विगुः क्लीबे स्यात् , **शिष्टप्रयोगात्** - पञ्चरात्रम् (**सुधा**)।

संख्यापूर्वपदः रात्रशब्दः नपुंसकलिङ्गः - त्रिरात्रम् - पञ्चरात्रम् (**गुरुबाल**.) ।

**माधवीयधातुवृत्तिः** -- रा दाने (**अदादिः**) -- 'रात्राह्नाहाः पुंसि' इति कृतसमासान्तस्य रात्रशब्दस्य पुंस्त्वम् । इदं पुंस्त्वम् असंख्यादेरिति **अमरसिंहः** - यथाह - ' रात्रादेः प्रागसंख्यकात् ' इति । **वृत्तिकार-**

**शाक्यमुनिप्रभृतयस्तु पुंस्त्वमेवाहुः।**

**सिद्धान्तकौमुदी** -- 814 रात्राह्नाहाः पुंसि 2-4-29 -- 'संख्यापूर्वं क्लीबम्' (लि 131) द्विरात्रम् - त्रिरात्रम् - गणरात्रम् ।

**प्रौढमनोरमा** -- संख्यापूर्वमिति। तथा च लिङ्गानुशासनसूत्रम् । ' अपथपुण्याहौ नपुंसकौ संख्यापूर्वा रात्रिः' इति । **अमरो'प्याह** - 'रात्रं प्राक्संख्ह्ययान्वितम्' इति। ' गणरात्रं निशा बह्व्यः ' इति च । पुंस्त्वाधिकारे स एवाह । 'रात्रान्ताः प्रागसंख्यकाः' इति । एवं स्थिते **द्विरात्रस्त्रिरात्र इति वृत्तिकारहरदत्तादिभिरुक्तं पुंस्त्वं प्रामादिकमेवेत्यवधेयम्** ।

**शब्दरत्नः** -- प्रामादिकमेवेति।समाहारद्विगावित्यर्थः । संख्यापूर्वं रात्रमित्यस्य प्रतिप्रसवविधित्वलाघवानुरोधेन समाहारद्विगावेव प्रवृत्तेः । भविष्यति मर्यादेति सूत्रस्थे त्रिंशद्रात्रः पञ्चदशरात्रः इति भाष्यप्रयोगे तु त्रिंशत् पञ्चदश वा रात्रयो यस्मिन्निति **बहुव्रीहिः** अच्प्रत्यन्वेति योगविभागात् समासान्तो बोद्ध्यः ।

**बृहच्छब्देन्दुशेखरः** -- गणरात्रमिति । समाहारे तत्पुरुषः । न च 'भविष्यति मर्यादावचने'वरस्मिन् ' इति सूत्रस्थः त्रिंशद्रात्रः पञ्चदशरात्रः इति भाष्यप्रयोगो विरुद्ध्यत इति वाच्यम् । त्रिंशद्रात्रयः सन्त्यस्मिन्निति **बहुव्रीहिसत्त्वेन** अदोषात् । 'अच् प्रत्यन्वव ' इति योगविभागात् समासान्तः । इदन्तु तत्पुरुषे एव । **तदधिकारे लिङ्गानुशासनेषु पठितत्वात् । तत्रापि प्रतिप्रसवविधिलाघवानुरोधात् समाहारद्विगावेव प्रवर्तते ।**
**(ख. पाठः) - वृत्युक्तं द्विरात्र इत्यादि तु षष्ठीतत्पुरुषे बोद्ध्यम् ।**

There is another angle to the understanding of **लिङ्गानुशासनम् of पाणिनि** --

**पतञ्जलि** at one or two places employed शब्दs that go against लिङ्गानुशासनम् --

समस्सुटि 8-3-6 -- संबन्धम् अनुवर्तिष्यते | Following 'घञजपाः पुंसि' (लिं) the word संबन्ध which is घञन्त should be in पुंलिङ्ग - संबन्धः । But Patanjali employed it in नपुंसकलिङ्ग ।
**कैयटः** -- अनुपूर्वस्य वृत्तेः सकर्मकत्वात् संबन्धमिति द्वितीया । कर्मणि वा घञ् । स च नपुंसके'पि बाधकाभावात् भवति । स्त्रियां तु क्तिन्नादिभिर्बाध्यमानत्वात् न भवति ।
**नागेशः** -- नपुंसके'पीति । ' **घञजपाः पुंसि' इति प्रायोवाद इति भावः**।
**दीक्षितः** (लिङ्गानुशासने) -- 34 पुमान् । अधिकारो'यम् । 35 घञजबन्तः । पाकः त्यागः । भावार्थ एवेदम् । नपुंसकविशिष्टे भावे क्तल्युड्भ्यां स्त्रीत्वविशिष्टे क्तिन्नादिभिर्बाधेन परिशेषात् । कर्मादौ तु घञाद्यन्तमपि विशेष्यलिङ्गम् । तथा च भाष्यम् - **'संबन्धमनुवर्तिष्यते'** इति ।
**नागेशः** -- 'भविष्यति मर्यादा...' 3-3-136 -- त्रिंसद्रात्र इति । **संख्यापूर्वं रात्रं क्लीबमिति त्वस्मादेव भाष्यप्रयोगात् लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य इत्युक्तेश्च अनित्यमिति भावः ।**

1.**वेद- काशिका - हरदत्त - पतञ्जलि** --- support पुंलिङ्ग -- द्विरात्रः त्रिरात्रः

2. **दीक्षित** blindly follows कैयट -- does not refer to वेद - भाष्यप्रयोग (मर्यादावचने..)

3. **नागेश** makes self contradictory statements -- follows दीक्षित in **शन्दरत्न - बृहच्छब्देन्दुशेखर ।** In **उद्योत** he says **लिङ्गानुशासनं प्रायोवादः / अनित्यम् ।**

If we take ख-पाठ -- what is meant by द्विरात्र इत्यादि षष्ठीतत्पुरुषः -- what is the विग्रह ? And why to run till बहुव्रीहि in भाष्यप्रयोग ? Why the same is not applicable in वेद?

**नागेश was writing all the three works -- उद्योत - बृहच्छब्देन्दुशेखर - लघुमञ्जूषा -- simultaneously .**

What happened to - यथोत्तरं मुनीनां प्रामाण्यम् ?

Finally , I rather think one can use -- द्विरात्रः / द्विरात्रम् -- नवरात्रः / नवरात्रम् ।

**अत्र विद्वांसः प्रमाणम् ।**

धन्यो'स्मि

Thursday, December 14, 2023